## महाकाव्यम्

दृश्यश्रव्यभेदेन काव्यं द्विविधम्। दर्शनयोग्यं यत् काव्यं तत् दृश्यकाव्यम्। श्रवणयोग्यम् काव्यम् श्रव्यकाव्यमिति। तत् श्रव्यकाव्यं पुनः गद्यपद्यभेदेन द्विविधम्। पद्यस्य लक्षणे आलंकारिकविश्वनाथकविराजेन उक्तम् - 'छन्दोबद्धपदं पद्यम्' इति अर्थात् वृत्तमयं पद्यकाव्यं वृत्तहीनञ्च गद्यमिति। पद्यकाव्यस्य आलोचनावसरे तेन आदौ महाकाव्यस्य आलोचना क्रियते। तथाहि महाकाव्यस्य सविस्तारं लक्षणं सहित्यदर्पणग्रन्थे अस्माभिः प्राप्यते। (यथा -

"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।।३१५।।

सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।

एकवंशभवा भूपाः कूलजा बहवोऽपि वा।।३१६।।

श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।

अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।।३१७।।

इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्।

चत्वारस्तस्य र्वाः स्युस्तेष्वेकं च फलं भवेत्।।३१८।।

आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा।

क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्।३१९।।

एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।

नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।३२०।।

नानावृत्तमयः क्वापि सर्गः कश्चन् दृश्यते।

सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्॥३२१।।

सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः।

प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः।।३२२।।

संभोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः।

रणप्रयाणोपयममन्त्रपुत्रोदयादयः॥३२३।।

वर्णनीया यथायोगं सांगोपांगा अमी इह।

कर्वेवृत्तस्य वा नाम्ना नायकस्येतरस्य वा।३२४।।

नामास्य सर्गोपादेयकथया सर्गनाम तु।") इति।

तस्य लक्षणस्य विश्लेषणे सति पद्यात्मककाव्येषु श्रेष्ठस्य महाकाव्यस्य कानिचित् वैशिष्टानि दृश्यन्ते। तद्यथा -

प्रथमतः - महाकाव्यं सर्गेषु विभाजनीयम्। तत्र सर्गसंख्या अष्टाधिकः करणीयः। यथा - रघुवंशमहाकाव्यम् ऊणविंशतिसर्गेषु विभक्तम्, शिशुपालवधम् विंशतिसर्गेषु, किरातार्जुनीयं अष्टादशसर्गेषु, नैषधचरितं द्वाविंशतिसर्गेषु च विभक्तम्। यद्यपि अस्य व्यतिक्रमः नियमः अपि दृश्यते। यथा रामायणं काण्डेषु महाकाव्यं पर्वेषु च विभक्तम्।

द्वितीयतः - महाकाव्यस्य नायकः धीरोदात्तगुणसम्पन्नः कोऽपि देवः भवितुमर्हति। यथा - शिशुपालवधमहाकाव्यस्य नायकः श्रीकृष्णः एकः देवः। महाकाव्यस्य नायकः धीरोदात्तगुणसम्पन्नः कोऽपि सद्वंशजः क्षत्रियः अपि भवितुमर्हति। यथा- किरातार्जुनीयमहाकाव्यस्य नायकः अर्जुनः एकः सद्वंशजातः क्षत्रियः। महाकाव्यस्य नायकाः एकवंशोद्भूतस्य नृपतिजनाः अपि च भवितुमर्हति। यथा - रघुवंशस्य नायकाः दिलीपः, रघुः, अजः, दशरथः, रामचन्द्रः च एते धीरोदात्तगुणयुक्ताः नृपतिगणाः। धीरोदात्तनायकस्य लक्षणं तावत्-

'अविकत्थनः क्षमावानतिगम्भीरो महासत्वः।

स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः।। (सा.द. ३यः,३२) इति।

तृतीयतः - शृङ्गार-वीर-शान्तरसानां मध्ये एकः कोऽपि महाकाव्ये प्रधानरसः भविष्यति। यथा- शृङ्गाररसप्रधानं नैषधचरितम्, वीररसप्रधानं शिशुपालवधम्, शान्तरसप्रधानं माहाभारतम् च इति। यद्यपि अस्य व्यतिक्रमः दृश्यते यथा रामायणं करुणरसप्रधानमिति। महाकाव्ये अन्य रसाः तु गौणरूपेण स्थास्यन्ति।

चतुर्थतः - नाटकस्य इव महाकाव्येषु अपि मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहणसन्धियुक्तः भवेत्।

पञ्चमतः - ऐतिहासिकघटनाम् अबलम्ब्य अथवा सज्जनपरिवेष्टितसमाजे प्रचलितं किमपि आख्यानमुपजीव्य महाकाव्यनिर्माणं कर्तव्यम्।

षष्ठतः - धर्मः, अर्थः, कामः, मोक्षः च इति वर्गचतुष्टयस्य वर्णना महाकाव्येषु स्थापनीया। एतेषां कोऽपि एकः मुख्यरूपेण दर्शनीयः।

सप्तमतः - देवेभ्यः नमस्कारमाध्यमेन, आशीर्वादमाध्यमेन, वस्तुनिर्देशमाध्यमेन वा महाकाव्यं सूचयेत्। यथा - आदौ 'वागार्थविव सम्पृक्तौ' इत्यनेन पार्वतीपरमेश्वराभ्यां प्रणामं ज्ञापयित्वा रघुवंशस्य आरम्भः। रुक्मिणीहरणे 'शिवः शिवापदतलगः' इति आशीर्वचनमादौ प्राप्यते। तथाहि कुमारसम्भवस्य प्ररम्भे 'अस्त्युत्तरस्यां दिशि' इति वस्तुनिर्देशः परिलक्षते।

अष्टमतः - महाकाव्येषु क्वचित् दुर्जनस्य निन्दा सज्जनस्य गुणकीर्तनं च दृश्यते।

नवमतः - अन्तिमान् श्लोकान् विहाय महाकाव्यस्य कस्यापि सर्गस्य सर्वाः श्लोकाः एकस्मिन् छन्दे एव लेखनीयाः। सर्गान्ते भिन्नछन्दे रचितः श्लोकः अन्य सर्गस्य सूचकः। महाकाव्यस्य केषु अपि सर्गेषु श्लोकाः अत्यल्पाः अत्याधिकाश्च न भवेयुः।

दशमतः - महाकाव्येषु कविना यथासम्भवम् सन्ध्या, सूर्यः, चन्द्रः, रात्रिः, प्रदोषः, अन्धकारः, दिवसः, प्रातः, मध्याह्नः, मृगया, वनम्, पर्वतः, ऋतुः, सागरः, सम्भोगः, विप्रलम्भः, मुनिः, यज्ञः, युद्धयात्रा, यन्त्रणा, विवाहः, पुत्रजन्मः च इति एतेषां विषयाणां वर्णना करणीया।

एकादशतः - महाकाव्यस्य नामकरणविषये आलंकारिकविश्वनाथकविराजेन उक्तम् कवेः नामानुसारं (यथा - भट्टिकाव्यम्), नायकस्य नामानुसारम् (यथा- किरातार्जुनीयम् इति) अपि च वर्णनीयविषयस्य प्राध्यान्यानुसारेण तु (यथा - कुमारसम्भवमिति) महाकाव्यस्य नामकरणं विधेयम्।

द्वादशतः - महाकाव्येषु सर्गाणां पृथकनामकरणं कर्तव्यम्। सर्गस्य नामकरणं तत्सर्गस्थितवर्णनीयविषयस्योपरि करणीयम्। यथा- रघुवंशस्य अष्टमसर्गस्य नाम 'अजविलापः' इति, चतुर्दशसर्गस्य नाम 'सीतापरित्यागः' इति।

एवं आलंकारिकेन विश्वनाथकृतसाहित्यदर्पणग्रन्थे महाकव्यलक्षणस्य यथासम्भवं विश्लेषणं कृतमिति शिवम्।